# काशिकाया: पञ्चमाध्यायस्थ-शेषाद्विभाषा इति सूत्रस्य विशिष्टमध्ययनम्

गोविन्द सोरेन
शोधच्छात्र, व्याकरणविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

**Article Info**
Volume 4 Issue 4
Page Number : 79-83

**Publication Issue :**
July-August-2021

**Article History**
Accepted : 15 July 2021
Published : 30 July 2021

**सारांश:-** अष्टाध्याया: वृत्तिग्रन्थेषु मूर्धन्यस्थानं भजते इयं काशिकावत्ति:। 'काशिका'इति नामकरणस्य अन्वर्थसज्ञां प्रतिपादयति सृष्टिधरार्चाय: । यथा 'काशयति प्रकाशयति सूत्रार्थमिति काशिका 'इति। ग्रन्थकर्ता स्यवं ग्रन्थादौ प्रोयजनमित्थं प्रादशर्यत् –**वृत्तौ भाष्ये तथा धातुनामपारायणादिषु। विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रह:।।1।।** अष्टाध्याया: सूत्राणां क्रमविना अर्थ: स्पष्टता न जायते। काशिकावृत्ति: अष्टाध्याया: प्रकरणानुसारी व्याख्यानग्रन्थ: भवति। अतेव काशिकाया: ज्ञानं विना पाणिनिव्याकरणस्य मूलतत्व ज्ञानं सम्भव: न भवति। अष्टाध्यायीक्रमानुसारेणेव व्याकरणस्याध्ययनं अतिवसरल तथा अधिक: लाभदायक बुद्धिस्फुरणं च भवति। कौमुदीक्रिम अध्ययनं निमित्तं काशिकाया: आवश्यता भवति। अत: काशिकाया: पञ्चमाध्यायस्थ–शेषाद्विभाषा इति सूत्रस्य विशिष्टमध्ययनम् इति शीर्षकमाश्रित्य मया शोधलेख: विलिख्यते।

**विशेषशब्दा:** – शेषाद्विभाषा, शेषपदार्थ: क: ?शेषगहणप्रयोजनं किम् ? शेष: किमपेक्ष: ? इत्यादय:।

## 1. शेषाद्विभाषा। 5.4.154

उक्तादन्य: शेष: इति बहुव्रीहिसमास:, तस्मात् शेषादिति पञ्चम्येकवचनान्तपदम्। विभाषा इति प्रथमैकवचनान्तपदम्। सूत्रेऽस्मिन् समासान्ता:, बहुव्रीहौ, कप् इति चानुवर्तते।

बहुव्रीहौ समासे शेषात् प्रातिपदिकात् विकल्पेन समासान्त: कप्प्रत्ययो भवति। यथा – बह्व्य: खट्वा यस्मिन् स: बहुखट्वक:, बहुखट्वाक:, बहुखट्वो देश:। प्रथमरूपे तु 'आपोऽन्यतरस्याम्' इति सूत्रेण अंगविकल्पपक्षे ह्रस्वो भवति। द्वितीयरूपे अनेन सूत्रेण कप्प्रत्ययो विहित:। तृतीयरूपे तु 'गोस्त्रियोरुपसर्जनस्य' इत्यनेन सूत्रेण उपसर्जनसंज्ञको 'खट्वा' इति शब्द: ह्रस्वो भवति। अत्र विकल्पपक्षे प्राप्त कप्प्रत्ययो नास्ति। एवंप्रकारेण कप्ह्रस्वयो: वैकल्पिकं रूपत्रयं निर्मीयते।

'ऋक्पूरब्धू:पथामानक्षे' इति सूत्रेण सामान्यरूपेण प्रत्ययो विधीयते तर्हि कथं अनृक्कं साम, बह्वक्कं सूक्तम् इत्यत्र कप्विधीयते ? एवं न वक्तव्यं यतो हि तेन सूत्रेण विशिष्टार्थे प्रत्यय: इष्ट:। अनृच: माणवकार्थे तथा बह्वृच: चरणाख्यायामवगन्तव्यम्। एतद्धेतो: सामसूत्रार्थयो: बहुव्रीहे: समासान्तापेक्षशेषत्वं वर्तते, प्रत्यये न बाध्यते।

शेषादिति इति किमर्थम् ? यथा – प्रियपथ: इत्यत्र 'ऋक्पूरब्धूपथामानक्षे' इति सूत्रेण अप्रत्ययो विहित:, शेषस्तु नास्ति, अत: कप् न भवति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**समीक्षा**

"शेषाद्विभाषा" इति सूत्रव्याख्यायां न्यास:[1] पदमञ्जरीकारयो:[2] मते कीदृश: शेष: गृहित: इति विषये पक्षत्रयं सम्भवति। उभाभ्याम् पक्षत्रयमपि उपस्थाप्य द्वयो: • आपत्ति प्रदर्श्य समासान्तमात्रापेक्षस्य शेषस्य समर्थनं कृतमस्ति। यथोक्तम्- अत्र शेष: कवपेक्ष, बहुव्रीह्यधिकारापेक्ष: समासान्तमात्रापेक्षी वा स्वीक्रियते। आद्ये पक्षे व्याघ्रपात् सुगन्धि: इत्यादावपि नित्यकप् विषय- वर्ज्य सर्वत्र प्रसज्येत, द्वितीये द्विदशा इत्यादौ कप्-प्रसक्ति: स्यात्, अत: द्विदशा इत्यादौ कप् प्रसक्ति: स्यात्, अत: तृतीयं पक्षमाश्रित्य यस्मात् बहुव्रीहे: समासान्तो न भवति स शेष: इति विविच्य समासान्तापेक्ष शेष: स्वीकृत:। उभाभ्यामपि टीकाकृद्भ्याम् शेषग्रहणप्रयोजनमपि निरुपितम्।

हरदत्तेन विशेषत: यस्मात् बहुव्रीहे: समासान्तो न विहित: स: शेष: इति वचनं व्याचक्षाणेन इदं विचारितं यत् – **यस्मात् बहुव्रीहे: इत्यत्र या पञ्चमी सा बहुव्रीहिमाश्रित्यइत्यर्थतया ल्यल्लोपेकर्मणयधिकरणेन इति वार्त्तिकेन विधीयमाना पञ्चमी तेन यत्र आदेशरुपोऽपि समासान्त: शेषो न भवति। तेन व्याघ्रपात् सुगन्धि:, कुण्डोघ्नी इत्यादौ पाक्षिकोऽपि कप् न भवति। प्रत्यय प्रायत्वादवा समासान्तस्य यस्मादिति वृत्रौ उक्तम्।**[3]

एतत्सूत्रभाष्ये भगवता पतञ्जलिना अधोलिखितविषयमालक्ष्य चर्चा कृता

(क) शेषपदार्थ: क: ?

(ख) शेषगहणप्रयोजनं किम् ?

(ग) शेष: किमपेक्ष: ?

**आदौ "शेषादित्युच्यते क: शेषो नाम ? याभ्य: प्रकृतिभ्यो समासान्तो न विधीयते स शेष:**[4]" इत्युक्त्वा शेषपदार्थविचार सम्प्रवर्तित:। तदनु "किमर्थं पुन: शेषग्रहणं क्रियते" इत्युपक्रम्य शेषग्रहणप्रयोजनं विचारितम्, समासान्तेषु बाध्यबाधक भाव:, सावकाशनिरवकाशनिर्धारणमुखेन[5], पूर्वापरकथनक्रमेण च समालोचित:। तत: परं " किं पुनरिदं शेषग्रहणं कबपेक्षम्" इत्यतोऽन्तं यावच्छेषग्रहणस्यापेक्ष्यनिर्धारकविवेचनं दृश्यते। शेषपदार्थ विवेचनोऽपि किमपेक्ष: शेष इत्येवाशय: प्रतिभाति अत: सर्वमाकल्य विचारद्वये एव सर्वं भाष्ये पर्यवसन्नमिति प्रतीयते। शेषग्रहणप्रयोजनविषयेऽयमाशय: ज्ञायते यदि शेषग्रहणं न क्रियेत तदा विभाषेत्येव सूत्रं स्यात्तदा याभ्य: प्रकृतिभ्य: समासान्तो विधीयते ताभ्योऽपि कप् प्राप्नोती त्यादावुक्तम्। पुनर्नै तदस्ति प्रयोजनमित्युक्त्वेदमुच्यते यत् प्रतिपदमुच्चार्य यै: पूर्वं समासान्ता: विहिता, ते समासान्ता अत्र बाधका भविष्यन्ति, किन्तु बाधकास्त एव विधयो भवन्ति, ये निवरकाशा: भवन्ति, अत्र तु समासान्ता: सावकाशा:। कुत्र सावकाशा इति जिज्ञासायां: भाष्यकृतोच्यते यदत्र कप् विभाषा विधीयते यदा कप् न तदा सोऽवकाश इति। कप: प्रसङ्गे उभयं प्राप्नोति तदा परत्वात् कप् प्राप्नोति, कब्मा भूदत: शेषग्रहणं कर्त्तव्यमिति भाष्यस्याशय: प्रतीयते। }

पुनरत्र किमपेक्ष शेष इति जिज्ञासायां पक्षत्रयं सम्भवति, त्रयमपि निर्दिश्य सर्वत्र दोषमुद्भाव्यन्ते समासान्तापेक्षं शेषग्रहणमित्येव सिद्धान्तितमिति गम्यते। यथोक्तं भाष्यकृता- "**यस्माद्बहुव्रीहे: कब्न विहित इति, आहोस्वित्समासान्तापेक्षम् यस्माद् बहुव्रीहे**

---

[1] यद्यपि "वदि अभिवादनस्तुत्यो:" इत्यभिवादनेऽपि वदि: पठ्यन्ते, तथापि व्याख्यानात्स्तुत्यर्थस्यैव ग्रहणमिति दर्शयति। तेन वन्दित भ्रातृक इत्यत्र कब्भवत्येव। (पदम् 5.4.157)

[2] तस्माच्छेषग्रहणात् समासान्तापेक्ष: शेषो विज्ञायते। (5.4.157)

[3] पदमञ्जरी 5.4.154

[4] म.भा. – 5.4.154

[5] म.भा.– 5.4.154

**समासान्तो न विहित् इति ?" अन्ते चान्योऽपि पक्षः उच्यते अनन्तरो यो बहुव्रीह्यधिकारः सोऽपेक्ष्यते, अनन्तरे बहुव्रीह्यधिकारे यस्माद् बहुव्रीहेः समासन्तो न विहित** इति[6]।

यदि अत्र प्रथमपक्षमादाय कबपेक्षः शेषः स्वीक्रियते तदा अनृचः बह्वृचः इत्यत्रापि कप् प्राप्नोति, यतोऽत्र ऋगन्तात्कब्न विहितोऽत्र शेषत्वात्पक्षे परत्वात्कप् प्रसज्यते। यद्वि द्वितीयं पक्षं शेषं मत्वा विचार क्रियते तदा अनुक्कं साम बहक्क सूक्तमिति न सिद्धयति, यतः अत्र 'ऋक्पूरब्धूपथामानक्षे' इत्यनेन सामान्यतया अप्रत्यय विधानमसृयेव, पुनरत्र कप् न प्राप्नोतीति प्रश्नः समुदेति। यदि पुनः कबपेक्षः शेषः स्वीक्रियेत तदा अनृचो बह्वृच इत्यत्र दोष प्रदत्तः किन्तु तत्र तु "विशेष एतद् वक्तव्यम्" अर्थविशेषे प्रत्यय इष्ट इति मत्वा माणवके चरणाख्यायाञ्चेति विशेषे इष्टसिद्धि कर्तुं शक्यते। किन्तु यदि विशेष एतद् वक्तव्यमित्युच्येत तदा 'ऊधसोऽनङ्' इति सूत्रेऽपि 'ऊधसोऽनङि स्त्रीग्रहणं कर्त्तव्यम्' इति वार्तिकं पठितं येन महोधांः पर्जन्यः, घटोधो धैनुकम् इत्यत्र अनङ् न भवति। अतः कुण्डोप्नी इत्यत्र कपः प्रसङ्गो भवत्येव।

अनन्तरं भाष्यकृतेदं विचारितं **यन्मास्तु कवपेक्षः शेषो न वा समासान्तापेक्षः, अपितु अनन्तरे बहुव्रीह्यधिकारे यस्माद् बहुव्रीहेः समासान्तो न विहितः स शेष इति मन्यतामिति पक्षे - अनृचः बह्वृचः इत्यत्र बहुव्रीह्यधिकारात्प्रागकार विधानच्छेषत्वात् पक्षे कप् प्रसज्यते इति दोषः**[7]**।**

एवं त्रिष्वपि पक्षेषु दोषं प्रदर्श्यान्ते सिद्धान्ततया समासान्तापेक्षः शेष इति निश्चितम्। अत्र कैयटो युक्तं भाष्यं व्याचक्षण आह– **कः शेष इति प्रश्ने क आधार इति मनसि निधाय प्रदीपकार तदुपयुक्ततां साधयति यदत्र शेषपदेनानेकस्य पक्षस्य ग्रहणं सम्भवतीति अन्यतराश्रयणस्य निर्णयार्थमिदं वचनं प्रवर्तत इति तदाशयः**[8]। यस्तु सिद्धान्तं न वेत्ति स सामान्यरूपेण शेषं निर्धारयति यत् याभ्यः प्रकृतिभ्यः समासान्तो न विधीयते स शेष इति। तदनु शेषग्रहण प्रयोजनविवेचनभाष्यमादाय प्रदीपकार एवं व्याचष्टे यत् अत्रापि प्रश्नस्य बीजमिदं यदत्र सामान्येन कप् विधीयतां तस्य विशेषे समासान्ता बाधका भविष्यति अतः शेषग्रहणस्य किं प्रयोजनम् ? भाष्यकारेण यदिदं समाधानं प्रस्तुतं यत् "कपः प्रसङ्गे उभयं प्राप्नोति, परत्वात्कप् प्राप्नोति, तस्माच्छेषग्रहणं कर्त्तव्यम्" तत्र उपदशा उपविंशा इत्यादिषु नित्यं डजादय इष्यन्ते इति विशिष्टं निर्दिशति कैयटः[9], यद्यपि नागेशेनेदं चिन्त्यमित्युक्त्वा प्रत्याख्यातम्[10]।

शेषग्रहणे पक्षद्वयोपपादकभाष्यमादाय कैयट एवं विवृणुते यत् प्रश्नस्येदं वीजं यत् यत्सामान्येनेदमुक्तं यत् याभ्यः प्रकृतिभ्यः समासान्तो न विधीयते स शेषस्तत्र विशेषं ज्ञापयितुं प्रश्न उपस्थाप्यते। शेषग्रहणस्थानर्थकत्वं सिद्धान्ततया मनसि निधाय यद्यपीत्यादिना व्याख्यानमारभते कैयटः। यद्यपि कबपेक्ष शेष इति स्वीकारे तु शेषग्रहणमनर्थकमेव यतस्तद्विनापि अशेषान्नित्यं कब्विधीयते अतस्तद्विधानसामर्थ्यात् विभाषितकपः प्रसङ्ग एव नास्तीति कृत्वा शेषादेव कपो विकल्पेन विज्ञायते, तथापि विचारायात्र कबपेक्षः शेष इति पक्षो विविच्यते।

---

[6] म.भा.– 5.4.154

[7] म.भा. प्रदीपः 5.4.154

[8] म.भा. प्रदीपः 5.4.154

[9]. म.भा. प्रदीपः 5.4.154

[10]. म.भा. नागेशः 5.4.154

प्रथमपक्षे दोषमुद्भावचन् भाष्यकारो यदाह– "**यदि विज्ञायतेकबपेक्षम्, अनृचः बहुचः इत्यत्रापि प्राप्नोति**"[11] तत्र 'अनृचः' इत्यत्र कथं परत्वात्कपः प्रसङ्ग दर्शयति कैयटः– **ऋगन्तात्कप् न विहितः अतो हेतोः शेषात्पक्षे परत्वादत्रापि कप् प्रसज्यते, यस्मिन् पक्षे कप् न भविष्यति तत्पक्षे अकारोऽवकाशः, समासान्तरं च सावकाशमेव**[12]। प्रथमपक्षे दोषान्तोपपादकभाष्यविवेचनप्रसङ्गे "विशेषे एतद्वक्तव्यम् – **अनृचो माणवेबहवृचश्चरणाख्यायाम्**[13]" इति भाष्ये विशेष विषयादेव अत्र कप् न भविष्यति इति भाष्यं व्याचष्टे कैयटः यद्येवं विशेषत्वादेवं ऊधसोऽनङ्' इत्यत्रापि स्त्रीग्रहणं चोदितं तत्रापि तस्मिन् क्रियमाणेऽपि प्राप्नोत्येव। अत्र कैयटः अभयथा दोषं दर्शयति – **स्त्रीग्रहणे अक्रियमाणे दोषः क्रियमाणेऽपि दोषः**[14]। तद्यथा– अक्रियमाणे स्त्रीग्रहणे 'कुण्डोघ्नी' इत्यत्र परत्वात्कप् प्राप्नोति, यदि क्रियते तदापि तस्य नपुंसकनिवृत्त्यर्थत्वात् पक्षे परत्वात्तस्य प्रसङ्गः अस्त्येव। वस्तुतः कैयटमते भाष्ये उक्तवचनमुदाहरणमात्रम्, एतदतिरिच्यात्रापि दोषःतद्यथा– **उपदशादिषु पक्षे कप्प्रसङ्गः**[15] इति भावः। नागेशेन पुनरस्य प्रत्याख्यानं 'दोषश्चिनृचः' इत्याद्युक्त्वा कृतम्। – –

अत्र शेषग्रहणस्य अपेक्षानिर्धारकभाष्यव्याख्याने कैयटेनेदं निर्णीतं यत्समासान्तापेक्षमेव शेषत्वमाश्रयीयमिति। अत्र कैयटेन भाष्यं चिन्त्यमित्युक्त्वा भाष्यवचनस्य चिन्तनीयतोक्ता किन्तु नागेशेन स्वोद्योते "वस्तुतः" इत्यादिनोपक्रम्य भाष्याशयः प्रकाशितः।

तद्यथा – **नैव कबपेक्षमिति। शेषग्रहणानर्थक्यप्रसङ्गात्, यस्माद्धि नित्यः कविहितस्तस्माद्विभाषा न प्राप्नोति, विरोधात् इति पूर्वोक्तन्यायात् समासान्तपेक्षमपि न भवति, अनृक्कं वहक्कमित्यत्र को प्रसङ्गात्। अनन्तरे बहुव्रीह्यधिकार इति। एवं च "ऊधसोऽनङ्" इत्यनन्तरे बहुव्रीह्यधिकारे अनडो विधानात् कुण्डोघ्नीत्यादौ स्त्रियां कब्न भवति। कथमनृच इति' बहुब्रीह्यधिकारात्प्रागकारविधाना छेषत्वात्पक्षे कप्प्रसङ्गः। वक्तव्यमेवैतदिति। यद्येवं समासान्तापेक्षेऽपि शेषत्वेऽनृच बहुचयोर्विशेष वचनादन्यत्रानृक्क वह्वक्कयोः पक्षे कपः सिद्धत्वात् कस्यचिद्योषस्याप्रसङ्गात्किमर्थमनन्तरबहुव्रीह्यधिकारापेक्षः शेषः आश्रियते। बहुव्रीह्यधिकाराच्च तत्पुरूषादिभ्य कपोऽप्रसङ्गः। किं चोपदशा इत्यादौ पक्षे कप्प्राप्नोति, अनन्तरे बहुव्रीह्यधिकारे डचोविधानात्। तथा प्रियपथः, प्रियधुर इत्यत्रापि प्राप्नोति, तस्मात् समासान्तापेक्षमेव शेषत्वमाश्रयणीयमिति चिन्त्यमेतद्भाष्यम्**[16]**।**

अत्रत्यं प्रदीपं नागेशः एवं व्याख्याति येन पक्षत्रयमपि सुस्पष्टं प्रतीयते किं कबपेक्षः, समासान्तमात्रापेक्षः, उतः अनन्तर बहुव्रीह्यधिकारापेक्षः इत्यर्थः। कैयटस्य सामान्येन इति पदस्यार्थकथयन् नागेशः उट्टङ्कयति समासान्तमात्रापेक्षत्वेन इति। किमर्थं पुनः शेषग्रहणं क्रियते इति प्रश्न औचित्ये कैयटेन यत् प्रस्तावना प्रस्तुता तत्र

नागेशः कैयटाशयं स्पष्टयति यत्–शेषपदार्थ प्रदर्शन द्वारा एव शेषग्रहणस्य फलमपि उक्त प्रायः वर्त्तते। पुनः शेषग्रहणविषये किमर्थमिति प्रश्नः नोपपद्यते। अतः एव प्रदीपकारः सामान्येन विभाषा कब् विधीयताम् इत्यादिना प्रश्नस्योपपत्रिं साधितवान्, कैयटेन उपदशाः उपविंशाः इत्यादिषु नित्यं डजादय; इष्यन्ते इति यदुक्तं तद्विषये नागेशेन इदं चिन्त्यम् इत्युक्त्वा सहेतुक्रम्

---

[11]. म.भा. 5.4.154

[12]. म.भा. प्रदीपः 5.4.154

[13]. म.भा. 5.4.154

[14]. म.भा. प्रदीपः 5.4.154

[15] म.भा. प्रदीपः 5.4.154

[16] म.भा. प्रदीपः – 5.4.154

प्रत्याख्यातम्[17]। तद्यथा **इदं चिन्त्यम् अस्याः बहुव्रीहेः शेषाधिकारस्थत्वाभावात्[18]**। नागेशस्यायमभिप्रायः यत् उपदशाः इत्यादौ यः बहुव्रीहिः सः शेषाधिकारस्थः नास्ति। इदं बहुव्रीहिप्रकरणभाष्ये स्पष्टमुक्तं विद्यते। अतः स्वक्षः इत्यादौ नित्यं षच् इष्यते इति वक्तुम् उचितम्। भाष्ये यत् समासान्तापेक्षमनृक्कं साम वह्वक्क सुक्तम् इत्येन सिद्धयति इति यदुक्तं तत्र नागेश **प्रियपथिकादेरपि उपलक्षणमिति मनुते[19]।** विशेष एतत् इति प्रतीकमादाय कैयटेन विशेषविषयात् वचनात् अत्र कप् न भविष्यति इति यदुक्तं, तत्र सङ्गतिं ब्रवीति नागेशः यत्, विशेष वचन सत्वेऽपि पक्षे कप् कुतो न भवति इति समाधानाय एव कैयटवचन प्रवर्त्तते तत एव इति अर्थात् - विनिगमनायाः अभावेन अनृचः माणवे एव माणवे अनृचः एव इति उभयविधनियमस्य आश्रयणमत्र भवति। एवं विशेषेन कपो वाधे ऊधसोऽनङि अपि दोषः इति यद्युच्येत स्त्रीग्रहणेन पुनर्विधांनार्थेन कपो वाधः इत्येवप्रकारेण यदि कश्चित् भ्राम्येत तदर्थमेव भाष्ये इदमुच्यते यत्-स्त्रीग्रहणं चोदितं, तस्मिन् क्रियमाणेऽपि प्राप्नोति, अत्र भाष्ये यत् अपिग्रहणं कृतम् तस्य अनुक्तसमुच्चयार्थकत्वात् क्रियमाणेऽपि अक्रियमाणेऽपि इति उभयथा अर्थलाभः।

कैयटेन समासान्तापेक्षमेव शेषत्वमाश्रयणीयमिति उक्त्वा शेषस्वरूपं सिद्धान्तितम्'। भाष्यं च चिन्त्यमिति लिखितम् तत्र नागेशेन भाष्याशयः एवं प्रकाशितः, अवसाने च मम तु अनुक्त समासान्त बहुव्रीहित्वाभावान्न दोषः इति विलिख्य स्वकीयं मतं प्रकाश्य सुधियो विचारयन्तु इति विलिख्य च विचारार्थम् अन्येऽपि विद्वांसः समाहूताः[20], अत्रेदं नागेशीयं वचनम् - **वस्तुतस्तु पूर्वोक्त पक्षोपमर्देनैवास्य भाष्यस्य प्रवृत्तेरनन्तरबहुव्रीह्यपेक्षया शेषग्रहणमेवोचितम्। प्रियः पन्था यस्य इत्यर्थेऽपि प्रियपथिक इत्यादेः पक्षे सिद्धिरेव च प्रयोजनम् भाष्यादिष्टत्वस्यैव लाभात्। "समासान्ताः " इति सूत्रस्थ "उच्चधुरः इति प्रयोगस्तु कवभावपक्षे वोध्यः। न च समास सामान्यापेक्षनापेक्षत्वेन समन्वयात्। समासामान्यापेक्षत्वेनान्तरङ्गत्वस्य भाष्ये क्वाप्यना श्रयणाच्च"। न च "बहुव्रीहौ सक्थ्यक्ष्णोः " - इत्यतः पूर्वमेव तदर्थकशेषग्रहणं व्यर्थमितिवाच्यम्, "विभाषा श्यावा" - इत्यादिविषये पक्षे कबापत्तेः। मम तु अनुक्तसमासान्त बहुव्रीहित्वाभावान्न दोष इति सुधियो विचारयन्तु[21]।**

शेषाद्विभाषा इत्यत्र विवरणकारः कैयट्म उपस्थापयन् लिखति यत्ल**क्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इति परिभाषया प्रतिपदविधेरेव वलीयस्त्वं वोध्यते[22]**। अतः इजादि समासान्तः परमपि कपं वाधयिष्यते, अतएव उच्यते यत् उपदशाः, उपविंशाः इत्यादिषु नित्यं डजादयः इष्यन्ते इति। विवरणकारः एतावदेव उक्त्वा मौनमवलम्वते।

उद्द्योतनकारः कैयटाशयमेव विवृणोति यत् - अनेकस्य उपयुक्तत्वात् इति कैयटवचने कुत्र अनेकमुपयुज्यते इति स्पष्टयन् निर्दिशति कविधौ इतर समासान्ताविधौ च इति। सामान्येनाह इति वाक्यघटकं सामान्येनपदस्य कोऽर्थः ? इत्यत्र उपयुक्तप्रकृतिमात्रापेक्षया सामान्येन इति तात्पर्यम्। सामान्यशब्दस्यार्थः एव कैयटेन एवं प्रस्तुतः याभ्यः प्रकृतिभ्यः समासान्तो न विधीयते सः शेषः इति। डजादीनां पाक्षिकत्वमेवास्तु सर्वत्र च पक्षे कप् भवतु इत्यत्र इष्टिवचनं प्रस्तौति कैयटः उपदशाः, उपविंशाः इत्यादिषु नित्यं डजादयः इष्यन्ते। अस्य तात्पर्यं समुन्नयता अन्नंभट्टेन एवमुच्यते यत् **बहुव्रीहौ संख्येये**

---

[17] म.भा. नागेशः 5.4.154

[18] म.भा. नागेशः 5.4.154

[19] म.भा. नागेशः 5.4.154

[20] म.भा. नागेशः- 5.4.154

[21] म.भा. नागेशः- 5.4.154

[22] म.भा. विवरणकाकरः 5.4.154

**डजवहुगणात्, बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गत् षच्" इत्यादयो नित्या एवेति तेषां पाक्षिकत्वं नेष्यत इति शेषग्रहणं कर्त्तव्यमित्यर्थः[23]।**

कवपेक्षं शेषत्वमिति पक्षेतु शेषग्रहणमनर्थकं भवति। तथापि विचारमात्रं क्रियते इति कैयटवचनस्य आशयं बोधयति अन्नंभट्टः - **उरः प्रभृतिभ्यः कप् 'इति भविष्यतीति शेषग्रहणं व्यर्थमित्यर्थः[24]', संभावनामात्रेणाप्यन्यस्य दोषाभिधानमित्यर्थः[25]। यदि कवपेक्षया शेषत्वं स्वीक्रियते तर्हि ऋक्पूरब्धूपथामानक्षे" इति सूत्रेण विधीयमानस्य नित्यम् अप्रत्ययस्य पाक्षिकत्वं प्रसज्यते[26]।** अतः उच्यते-ऋगन्तात् कप् न विहितः इति शेषत्वात् पक्षे परत्वात् कप् प्रसङ्गः इति। अकारस्य अवकाशः समासान्तरञ्च इत्यत्र कीदृशः अन्वयः तत्र उच्यते- समासान्तरं च अवकाशः इति अन्वयः अर्धर्चः पुंसि च इत्यादि तत्पुरुषः एव अत्रावकाशः इति तात्पर्यम्' अनेन कपः अभावसिद्धिः कथं भवतीति जिज्ञासायामुच्यते "विशेषनियमात् वचनात् अत्र कप् न भविष्यतीति" तस्मिन्क्रियमाणेऽपि प्राप्नोति इत्यत्र अपिना क्रियमाणेऽक्रियमाणे इति उभयथा लभ्यते। तस्य पुंनपुंसकनिवृत्यर्थत्वात् अस्येदं तात्पर्यं यत्- कप् विवर्त्तकत्वं नास्ति। विशेषविषयत्ववचनात् अनृचः इत्यादौ यथा कप् न भवति। तथैव अत्रापि कप् न भविष्यति तत्रोच्यते एतत् उदाहरणमात्रम्, मुख्यदोषस्तु उपदशादिषु पक्षे कप् प्रसज्यते। ततः कविधानाभावेन कबपेक्षयाशेषत्वात् यदि कवपेक्षत्वपक्षः स्वीक्रियते तदा प्रागुक्त शेषग्रहणस्य आनर्थक्यं भवति अतः उच्यते - तस्मादेव हेतोः इति। आनर्थक्ये कोऽयं हेतुं इति विचारे उच्यते यत् - यस्माद्धि नित्यः कब्विहितः तस्मात् विभाषान प्राप्नोति विरोधादिति पूर्वोक्तन्यायात् इति। यदि समासान्तापेक्षत्वं स्वीक्रियते तदपि उक्तदोष न भवति अत उच्यते अनृक्कं वहुक्कं इत्यत्रापि कप् न स्यात्' अनन्तरोक्त दोष परिहारे उच्यते—ऊधसोऽनङ् "इत्यनन्तरे बहुव्रीह्यधिकारे अनङो विधानात् कुण्डोघ्नी इत्यादौ स्त्रियाम् कप् न भवति। समासान्तापेक्षत्वपक्षेऽपि प्रसक्तं दोषं उद्धरन् कैयटः यद्येवम् इत्यादि उपक्रमते। यदि बहुव्रीहिमात्रापेक्षत्वं स्वीक्रियते तदातत्पुरूषस्यानुवृत्तिरेव। अतः आनन्तर्य विशेषणं व्यर्थः भवति। अतः तत्पुरुषादिभ्यः कप् न स्यात् आनन्तर्यविशेषणे अनिष्टमपि प्राप्नोति। अत्र उच्यते उपदशाः इत्यादौ पक्षे कप् प्राप्नोति। ततः अतिरिच्यापि कप्प्रसक्ति कथयन् सलिखति यत् **अचोऽप्यनन्तरे बहुव्रीह्यधिकारे अभिधानात् अनन्तरबहुव्रीह्यपेक्षत्वे दोषो विद्यते एव। अतः समासान्तापेक्षमेव शेषत्वमाश्रयणीयम्**[27]।

नारायणीय टीकाकारः शेखरकारवत् अनेकस्य इति प्रतीकमादाय **पक्षत्रयं विलिखति। पक्षत्रयस्य सद्भावादेव सन्देहात् प्रश्नः**[28]। उत्तरवादिनः आशयम् स्पष्टयति नारायणीयकारः यत्-इतरः सामान्येनाहः यः विशेषो न प्रदर्शितः, उत्तरत्र प्रदर्शयिस्यति। कब्विधान सामर्थ्यात् इत्येतस्य तात्पर्यं लिखति नारायणीय नित्यं विधेः आनर्धक्यं प्रसज्येत अतो हेतो शेषग्रहणं विनापि शेषादेव कपो विकल्पः सेत्स्यति विचारमात्रं क्रियते इत्यस्य तात्पर्यं विलिखन् आह यत्- अस्य पक्षस्य सम्भवमात्रापेक्षा उपक्षेपः क्रियते। यतोहि पक्षाभासोऽपि निराकरणीयो भवति ऋगन्ताद् कपि सति "ऋक् पूरब्धूपथामानक्षे" इति अकारवचनम् अनवकाशं स्यात् अतः उच्यते कवभावपक्षेऽपि अकारस्य अनवकाशः। बहुव्रीहेः कप् विहितः। अतः तत्पुरूषादेः अकारस्यावकाशः स्यात् विशेष्ये एतत्वचनेन प्रकृतेः किमायातम् इत्यत्र उच्यते, अत्र कप् न, क्रियमाणेऽपि इत्यत्र

---

23 म.भा. उद्योतनकारः 5.4.154

24 म.भा. उद्योतनकारः 5.4.154

25 म.भा. उद्योतनकारः 5.4.154

26 म.भा. उद्योतनकारः 5.4.154

27 म.भा. अन्नंभट्टः- 5.4.154

28 म.भा. नारायणीयम् - 5.4.154

अपिशब्दलभ्यमर्थमुपरस्थापयति यत् क्रियमाणे यथाकप्प्राप्तिः तथा अस्मिन् पक्षे क्रियमाणेऽपि इति[29]। पुंनपुंसकनिवृत्यर्थत्वात् इतिवचनस्याशयं सोदाहरणं लिखति–नारायणीयकारः "महोधाः पर्जन्यः, कुण्डोधो धैनुकम् इत्यत्र पुंनपुंसकयोः अननिवृत्तिः स्त्रीग्रहणस्य प्रयोजनम्। कुण्डोघ्नी इत्यादौ तु कवपेक्षशेषत्वपक्षे कप्स्यादेव इत्यर्थः, उपदशादिषु डजादीनां कबपेक्षया शेषत्वात् कप्विकल्प प्रसङ्गः। तथासति शेषग्रहणस्यानर्थकं भवति[30]। तदेव यस्माद्धि इति वचनेन उपपादयति। वस्तुतः समासान्तापेक्षे एव शेषत्वे सर्वेष्टसिद्धिः भवतीति उपपाद्य – अनन्तरबहुव्रीह्यधिकारापेक्षत्वे दोष प्रसङ्गं दर्शयति किञ्च इत्यादिना एवं कैयटसम्मतं पक्षमेव नारायणीकारोऽपि समर्थयति इति प्रतिभाति। गन्धस्येदुत्पूतिसुसुरभिभ्यः – अनेन सूत्रेण उत् पूतिसु – सुरभि – इत्येतेभ्यः परस्य गन्धशब्दस्येकारादेशः भवति समासान्तः बहुव्रीहि समासे। इत् इत्यत्र तकारोच्चारणार्थः वर्त्तते, उद्गतो गन्धो अस्य उद्गन्धिः इत्यत्र अनेन सूत्रेण इकारादेशः फलति अस्मिन् सूत्रे भाष्यकारेण एकमुपसंख्यानवार्त्तिकमुपस्थाप्य विवेचितम्। तत्तद् वार्त्तिकं गन्धस्येत्वे तदेकान्तं ग्रहणमिति[31]। अस्येदं तात्पर्यं यत् यत्र विशेषभूतद्रव्यस्य एकान्त एकादेश एकावयवः स्यात् तत्रैव अयमादेशः भवति, यत्र एकादेशो न भवति तत्र इकारान्तादेशो न भवति। अत्र सुगत गन्धो अस्य सुगन्धः आपणिकः इकारान्तादेशो न भवति। भाष्यकारः अत्र इदमेव विचारितं यत् एवम् एकान्तग्रहणे सति अनुलिप्ते कथं स्यात्[32]? तत्रोच्यते यदि अनुगतं तत् अभि समीक्षितम् तदा सुगन्धिः इति भवितव्यम्[33], भाष्यस्य किं तात्पर्यम् इति वोधयितुं आदौ प्रदीपकारः कैयटः लिखति – यत्–गन्धशब्दोऽस्ति द्रव्यवाची, गन्धान् पिनष्टीति । अस्ति च गुणवाची चन्दनगन्धः[34] इति। तत्र गुणवाचिनः ग्रहणं यथास्यादतः वार्त्तिकमवतारयति। यत्र गन्धशब्दः गुणवाची तत्रैव इत्वं भवति। अन्यथा न भवतीति वार्त्तिकस्य तात्पर्यम्। गन्धः द्विविधः भवति, गुणगन्धः द्रव्यगन्धश्च यत्र गन्धो गुणो भवति। सः अन्यपदार्थस्य एकान्तः एकादेशो भवति। गन्धशब्दः द्रव्यवाचकोऽपि यथा शोभनः गन्धः अस्य इति सुगन्धः आपणिकः। अत्र गन्धशब्देन द्रव्यगन्धः उच्यते सः आपणिकस्य आपणे नियुक्तस्य एकादेशः भवति। अत्र गुणगन्धे एव इकारादेशो यथास्यात्, द्रव्यगन्धे माभूत् अतोहेतोः गन्धस्य इत्वविधेः तदेकान्तग्रहणं कर्त्तव्यमिति वार्त्तिकमवतारितम्, कैयटः अत्र गुणगन्धं विवेचयन् एवमाह यत्–रूपादि समुदायात्मकस्य द्रव्यस्य गन्धलक्षणोगुणः एकान्तो भवतीति[35]। अत्रैव पक्षान्तरमुपस्थापयन् तत्पक्षे कथं वार्त्तिकतात्पर्यस्य निर्वाहः इति विवेचयन् स आह यस्मिन् पक्षे द्रव्यं रूपादि गुणेभ्यः व्यतिरिक्तमवयवी भवति तत्पक्षे एकान्तइव एकान्तः इति धिया विमृश्य एकान्तशब्दस्य विवेचनं कर्त्तव्यम्, यतोहि तस्मिन् विद्ययानस्यैव तत्र उपलब्धि अतः एकान्त इव एकान्त इति मत्वा एकान्तशब्दस्य तात्पर्यम् आश्रीयते[36]।

अनुलिप्ते कथं भवितव्यमिति भाष्यस्यजिज्ञासोप स्थानेन समारब्धम् समाधानभाष्यमुपादाय कैयटः इत्थं विवेचयति यत्, यदि अनुगतं तत् अभिसमीक्षितं तदा इत्वं भवति यदा प्रविषिर्णम् तदा इत्वं न अनुगतं, प्रविषिर्णम् इत्यनयोः पदयोः किं तात्पर्यम् इति विवेचयितुं कैयटः उपक्रमते – अनुगतं निलीनं अविभागापनं कुङ्कुमादिर्यदा देवदत्तादेः भवति तदा तत्सत्वात् गन्धस्ये

---

[29] नारायणीयम् – 5.4.15

[30] नारायणीयम् – 5.4.15

[31] भाष्यवार्त्तिकम् (म.भा. – 5.4.135)

[32] अथ अनुलिप्ते कथं भवितव्यम् (म.भा. 5.4.135)

[33] महाभाषअयः– 5.4.135

[34] प्रदीपः– 5.4.135

[35] प्रदीपः– 5.4.135

[36] रूपादिसमुदायात्मकस्य, द्रव्यस्य गन्धलक्षणो गुण एकान्तो भवति। रूपादिव्यतिरिक्तावयविद्रव्यवादिपक्षेत्वेकान्त इवैकान्तः, तत्स्थस्योपलम्भादित्याश्रीयते (प्रदीपः – 5.4.135)

एकान्तत्वात् इत्वं भवति किन्तु यदा विभागेन अवस्थितम् कुंकुमादिः देवदयादेः पृथगुपलब्धं भवति तदा इत्वं न भवतीति कैयटाशयः[37]।

कैयटवचनं निपुणं व्याचक्षाणः नागेशभट्ट उद्द्योते एवं ब्रवीति यत्-एकान्तशब्देन अवयवः उच्यते। गुणश्च कथमवयवः अतः एकान्तपदेन तस्य ग्रहणं कथं स्यादिति जिज्ञासायामेव कैयटः गुणस्यएकान्तत्वं वोधयितुं लिखति यत् रूपादिसमुदायात्मकस्य, द्रव्यस्य, गन्धलक्षणो गुणः एकान्तः एवति[38]।

नागेशोऽत्र न्यासमतं पतञ्जलीमतञ्च पृथक्पृथक् उपस्थापयति, पतञ्जलेर्मतानुसारं द्रव्यस्य यत् लक्षणं तद्भिन्नं तच्च-अभूतसिद्धावयवानुगतस्तत्समूहो द्रव्यम् इति पतञ्जलेर्मतम् किन्तु न्यासनये- रूपादि व्यतिरिक्तावयवि द्रव्यम् भवति अतः तत्पक्षे गुणः तत्स्थत्वात् उपलभ्यते। अतः एकान्त इव एकान्तः इति व्याख्यानं युज्यते। तस्मिन् विद्यमानत्वात् गुणोहिभेदेन न गृह्यते इति नागेशाशयः[39]।

इदं सूत्रमाश्रित्य प्रवृत्तं प्रदीपं अनुरूध्य अन्येऽपि टीकाकृतः व्याचख्यु । तत्रादौ विवरणकारः कैयटाशयं वोधयति यत् गुणोगुणिनोः तथा सम्बन्धो न भवति यथा अवयवावयविनोः भवति, अतः गन्धस्येत्वे तदेकान्तग्रहणमिति वार्त्तिके यदेकान्तग्रहणमिति पदं तत्र अवयववाचिनः अन्तशब्दस्य प्रयोगः नोपपद्यने इति शङ्कां मनसि निधाय एव कैयटः लिखति यत् रूपादिसमुदायात्मकस्य द्रव्यस्य गन्धलक्षणो गुणः एकान्तो भवति[40]।

उद्धोतनकारोऽन्नंभट्टस्तु अत्र उपयुक्तं रहस्यं व्याचक्षाणः लिखति यत्-गन्धस्येत्वे इति वार्त्तिके एकवचनस्य निर्देशो वर्त्तते, अतः द्रव्यवाचिनः गन्धस्य ग्रहणं नास्ति, अपितु गुणवाचिनः एव ग्रहणम्[41] इति भाष्यस्य तात्पर्यं लिखति प्रदीपकारःगन्धशब्दोस्ति द्रव्यवाची, गन्धान् पिनष्टीति। अस्तिच गुणवाची चन्दनगन्धः इति।

अन्नंभट्टः लिखति यत् - अन्तशब्दः अवयववाचि भवति अतः गुणस्य द्रव्यावयवत्वं कथं सम्भवति इति तस्य एकान्तत्वं साधयितुं कैयटः स्वप्रदीपम् आरभते यत् रूपादि समुदायात्मकस्य द्रव्यस्य गन्धलक्षणगुणः एकान्तः एवति। यस्मिन् पक्षे रूपादि व्यतिरिक्तावयवि द्रव्यं भवति तत्पक्षे द्रव्यनिष्ठत्वमेव तदेकान्तत्वमुच्यते। अतोऽत्र एकान्तः इति एकान्त इति विवेचनं कर्त्तव्यम्[42]।

अत्र नारायणीयकारः वस्तुतत्वं सम्यग् विवेचयति। सः लिखति यत् एकान्तग्रहणेन व्यावर्त्त्यः विषयः कः इति दर्शयितुमेव गन्धशब्दस्य द्रव्यगुणोभयवाचकता उपस्थाप्यते। तदेकान्त इत्यस्य किं तात्पर्यम् इति जिज्ञासायां नारायणीये लिखितं यत् तत् शब्देन गन्धवाच्यं द्रव्यं विवक्षितम् तस्य एकान्तः एकदेशः। एकान्तग्रहणे गुणवाचिग्रहणस्य सिद्धिः कथं भवतीति अपेक्षायामेव प्रदीपे रूपादिपदेन वाक्यमवतारितम्। नारायणीयेटीकायाम् सांख्यमतं नैयायिकमतञ्च स्फुटं विवेचितम्। सांख्मतानुसारं रूपादिगुणसमुदायमेवं घटादि द्रव्यं भवति, अतः तादृश घटादि द्रव्ये गुणस्य एकान्तत्वमवयवत्वमुपपन्नं भवति किन्तु नैयायिकादिमतेतु गुणाश्रयो द्रव्यम् भवति अतः गुणेभ्यो व्यतिरिक्तं तद् भवति, अतहेतोः तादृश द्रव्ये गुणस्य एकान्तत्वमनुपपन्नं भवति, अतएव तत्पक्षे एकान्त इव एकान्त इति मत्वा योजना क्रियते। अस्य तात्पर्यं सोदाहरणं विशदयन् नारायणीयकारः लिखति यत्"यथा - करचरणादेश्वयवत्वं तथा तत्स्थत्वेनोपलम्भात् गुणस्याष्येकान्तत्वारोपेणाय व्यपदेश

---

[37] प्रदीपः- 5.4.135. 3

[38]. उद्द्योतः- 5.4.135

[39] ततो भेदेनागृह्यमाणस्येत्यर्थः। तत्स्थत्वात्ततोभेदेनागृह्यमाणत्वात्। (उद्योत 5.4.135)

[40] गुणगुणिनोरवयवावयविभावाभावादवयववाच्यन्तशब्दोग्नुपन्न इत्यत्राह रूपादि इति (विवरणम् - 5.4.135)

[41] उद्योतनम् 5.4.135

[42] उद्योतनम् 5.4.135

इत्यर्थः। अनेन तात्स्थ्यादविभागापन्नो यो लक्ष्यते स एवेहैकान्तत्वेन विवक्षितः, न तु तद्गुणत्वमिति दर्शितम्। तेन "सुगन्धिर्वायुः, उद्गन्धिर्वायुः, इति सिद्धं भवति। नहि गन्धो वायोर्गुणः। एतदेव प्रतिपादयितुं भाष्ये चोदयप्रतिसमाधानेअथ स्नातानुलिप्त इति। तत्र "यदनुगतम्" इत्यादिनोक्तं विषय विभाग स्फोरयितुमाह – अनुगतं निलीनमिति।

- **परिशीलितग्रन्थसूची**


1. संस्कृत व्याकरण शास्त्र का इतिबहास (श्री युधिष्ठरमिमांसकः) – चौखम्बा पब्लिशर्स, वाराणसी, उ.प्र. 2003
2. वैयाकरणसिद्धान्तकौमुदी ( भट्टोजिदीक्षितः) – चौखम्बा विद्याभवन, वाराणसी, उ.प्र. 2008
3. वैयाकरणभूषणसारः (कौण्डभट्टः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उ.प्र.1998
4. परिभाषेन्दुशेखरः (नागेशभट्टः) चौखम्बा सुरभारती प्रकाशन, वाराणसी, उ.प्र. 1997
5. काशिका ( वामनजयादित्यौ) – चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, उ.प्र. 1972 न्यासव्याख्या (जिनेन्द्रबुद्धिः), पदमञ्जरीव्याख्या (हरदत्तः)
6. अष्टाध्यायी सहजबोध (डाँ.पुष्पा दीक्षित) प्राच्यविद्या-प्रकाशन एवं पुस्तक – विक्रेता, 2011
7. काशिका का समालोचनात्मक अध्ययन( डा.रघुवीर वेदालङ्कार) नाग पब्लिशर्स, दिल्ली, 1997
8. काशिका पदमञ्जरी न्यासहिता प्र.भागः( डा.रघुवीर वेदालङ्कार) प्राच्यविधद्याप्रतिष्ठाम्, दिल्ली,1997
9. काशिका प्रकाश व्याख्योपेता प्र.भागः( डाँ.नारायणमिश्रः) चौखम्बा संस्कृत संस्थान, वाराणसी, 1928
10. काशिका भावबोधिनी सहिता तृ.भागः( डाँ.जयशरलाल त्रिपाठी) तारा प्रिटिंग वर्क्स, वाराणसी, 1986
11. वाक्यपदीयम् भर्तृहरिः,सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी,1997
12. व्याकरणसिद्धान्तसुधानिधिः( विश्वेश्वरसूरिः), राजस्थानपत्रिका,जोधपूर,1995
13. वैयाकरणसिद्धान्तकौमुदी (गोविन्दाचार्यः) चौखम्बा सुरभारती प्रकाशन, वाराणसी,2016
14. अष्टाध्यायी सहजबोध( डाँ.पुष्पा दीक्षित) प्रतिभा प्रकाशन्, दिल्ली, 2011